# संस्कृत वार्ता:

दिनाङ्क: 30.03.2026 प्रात: - 06:55

## अथ वार्ताः

### प्रधानमन्त्री-केरलम्

प्रधानमन्त्री एवं भाजपा-दलस्य वरिष्ठनेता नरेन्द्रमोदी उक्तवान् यत् पश्चिम-एशिया-संघर्षस्य मध्ये केन्द्रसर्वकारेण युद्धक्षेत्रेषु, भारतीयानां सुरक्षायाः कृते प्राथमिकता दत्ता यत्र च केरलम्-राज्यस्य जनाः अपि अधिकाः सन्ति । ह्यः पलक्काड-नगरे प्रचारसभां सम्बोधयन् प्रधानमन्त्री पश्चिम एशिया संघर्षस्य विषये सर्वकारस्य प्रतिक्रियां प्रकाशितवान् । तेन प्रोक्तं यत् भारतं वर्तमान-संघर्षस्य स्थितिं निकटतया निरीक्षते तथा च केन्द्रसर्वकारः देशे तस्य प्रभावं न्यूनीकर्तुं सक्रियरूपेण कार्यं कुर्वन् अस्ति ।

प्रचारभाषणे प्रधानमन्त्रिणा राज्यानां प्रबलराजनैतिकदलयोः वाम-लोकतान्त्रिक-दलस्य, संयुक्त-लोकतान्त्रिक-दलस्य च उपरि आरोपः कृतः यत् ते, राज्यं भ्रष्टाचारचक्रे स्थापयन्तः सन्ति । पश्चात् प्रधानमन्त्रिणा त्रिशूरु इत्यत्र पथप्रदर्शनं कृत्वा जनसभाऽपि सम्बोधिता ।

### पश्चिम-बंगाल:

पश्चिम-बंग-राज्ये एकस्मिन् प्रमुखे प्रशासनिकपरिष्कारे पश्चिम-बंग-निर्वाचनआयोगेन भोवानीपुर-नन्दीग्राम-सहितानां उच्चस्तरीय-विधानसभा-क्षेत्राणां सप्तत्युत्तर-एकशतम् आरक्षि-स्थानानां प्रभारी-पदाधिकारिणः निष्कासिताः । मुख्य-निर्वाचन-अधिकारि-कार्यालयस्य अनुशंसानाम् आधारेण निर्वाचन-आयोगेन एकादश-उच्चपदाधिकारिभिः सहितं आहत्य चतुरशीत्युत्तर-एकशतम् आरक्षि-अधिकारिणां स्थानान्तरणं पुनः संरेखणं च अनुमोदितम् ।

### काङ्ग्रेस-सूची

काङ्ग्रेस-दलेन पश्चिमबङ्ग-राज्ये आगामी-विधानसभा-निर्वाचनार्थं चतुरशीत्युत्तर-द्विशतम् अभ्यर्थीनां सूची प्रकाशिता अस्ति । बहराम-पुरतः पूर्वसांसदः अधीर-रंजन-चौधरी, भबानीपुरतः प्रदीपप्रसादः, मालतीपुरतः पूर्वसांसदः मौसम नूर, नन्दीग्रामतः एस.के जरियातुल होसैनः, पनिहाटीतः शुभाषीश-भट्टाचार्यः, बिधान-नगरतः राणजीतमुखर्जी च नामनिर्देशिताः सन्ति ।

### पश्चिम एशिया- दैनिकं विवरणम् :

सर्वकारेण उक्तं यत् देशे सर्वेषु पेट्रोल-वितरण-केन्द्रेषु पेट्रोलस्य डीजलस्य च पर्याप्तः भण्डारः उपलभ्यते । सर्वकारेण आग्रहः कृतः यत् जनाः तैलसम्बद्ध-मिथ्या-वार्तालापेषु विश्वासं न कुर्युः । पेट्रोलियम-प्राकृतिक-अनिल-मन्त्रालयेन उक्तं यत् उपभोक्तॄणां पोषणार्थं पेट्रोल-डीजल-तैलयोः कृते आबकारीशुल्कं दश-रुप्यकाणि / प्रतिलीटर न्यूनीकृतम् अस्ति ।

## पश्चिम एशिया इरान-अमेरिका :

इरान-संसदस्य सभापतिः आरोपं कृतवान् यत् अमेरिकादेशः मध्यपूर्वस्य संघर्षस्य समाप्त्यर्थं कूटनीतिकप्रयत्नान् कुर्वन् दृश्यते चेदपि गुप्तरूपेण स्थलाक्रमणस्य योजनां कुर्वन् अस्ति । सभापतिः मोहम्मद-बघेरः अवदत् यत् यदि अमेरिकीसैनिकाः देशं प्रविशन्ति तर्हि ईरानीसैनिकाः प्रतिक्रियां दातुं सज्जाः सन्ति । वर्धमान-कूटनीतिक-प्रयासेषु सऊदी अरब, मिस्र, तुर्किए, पाकिस्तानदेशानां विदेशमन्त्रिणः इस्लामाबादनगरे मिलित्वा संघर्षस्य न्यूनीकरणस्य क्षेत्रीयसुरक्षाप्रवर्धनस्य च उपायानां विषये चर्चां कृतवन्तः । समागमस्य अनन्तरं कोऽपि संयुक्तवक्तव्यः न प्रकाशितः। अमेरिकी-इजरायल-देशाभ्याम्, इरान्-देशे आक्रमणस्य आरम्भानन्तरं अधुना यावत् युद्धे त्रिसहस्राधिकाः जनाः मृताः सन्ति ।

## राजपत्र-अधिसूचना

सर्वकारेण राजपत्र-अधिसूचना प्रकाशिता यत्, विश्वव्यापि-ऊर्जा-आपूर्तिं प्रभावितं कुर्वत्याः भू-राजनैतिक-स्थितेः उद्धरणं कृत्वा, एकविंशतिः राज्येषु तथा केन्द्र-शासित-प्रदेशेषु सार्वजनिक-वितरण-प्रणाल्याः माध्यमेन केरोसिन् इति उच्चतम-मृत्तिका-तेलस्य आपूर्तिं कर्तुं अनुमतिः प्रदत्ता । एकस्याम् अधिसूचनायां पेट्रोलियम-प्राकृतिक-अनिल-मन्त्रालयेन उक्तं यत्, प्रत्येकस्मिन् मण्डले द्वौ ईन्धनस्थानकौ यावत् गृहेषु उपयोगाय मुख्यतया पाक-गृहेषु, प्रकाशार्थं च मृत्तिका-तैलस्य संग्रहणं वितरणं च कर्तुं शक्नुवन्ति।

## गोयल मत्स्यपालन विश्वव्यापारसंस्था

केन्द्रीयवाणिज्य-उद्योगमन्त्री पीयूषगोयलः प्रोक्तवान् यत्, मत्स्यक्षेत्रं भारतस्य खाद्यसुरक्षां सुरक्षितुं, आजीविकां सुनिश्चेतुं च प्रमुखां भूमिकां निर्वहति, येन नवति-लक्षाधिक-मत्स्यपालन-परिवाराणाम् समर्थनं भवति। भारतीय-प्रतिनिधि-मण्डलस्य नेतृत्वं कुर्वन् केमरूननगरे विश्वव्यापारसङ्घटनस्य चतुर्दश-तमे मन्त्रिसम्मेलने मन्त्री मत्स्यशासनस्य भारतस्य सन्तुलितं जनकेन्द्रितं च दृष्टिकोणं प्रस्तुतवान् ।

## आई-पि-एल्

आई-पि-एल् क्रिकेट्-क्रीडायां गतरात्रौ मुम्बईनगरे मुम्बई-इण्डियन्स्-दलेन कोलकत्ता-नाइट्-राइडर्स्-दलं षड्भिः स्तोभकैः पराजितम् । अद्य गुवाहाटी-नगरस्य बरसापारा-क्रिकेट्-क्रीडाङ्गणे, राजस्थान रॉयल्स्-दलं चेन्नै सुपर किङ्ग्स्-दलस्य विरुद्धं, सायं सप्तवादने क्रीडिष्यति ।

।। इति वार्ताः।।